# Nyasa Vimshatih with Commentary

# ન્યાસ વિંશતિઃ સવ્યાખ્યા

## Document Information

Text title : nyAsaviMshatiH

File name : nyAsaviMshatiH.itx

Category : major_works, vedAnta-deshika, viMshati, vedanta

Location : doc_z_misc_major_works

Author : vedAntadeshika

Transliterated by : Pallasena Narayanaswami ppnswami at gmail.com

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Commentary by the author himself

Source : Stotras of Vedanta Desika

Latest update : October 2, 2017, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

*sanskritdocuments.org*

# ન્યાસ વિંશતિઃ સવ્યાખા

શ્રીમાન્ વેङ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

સિધ્દં સત્સંપ્રદાયે સ્થિરધિયમનઘં શ્રોત્રિયં બ્રહ્મનિષ્ઠ
સત્ત્વસ્થં સત્યવાચં સમયનિયતયા સાધુવૃત્ત્યા સમેતમ્ ।
ડમ્ભાસૂયાદિમુક્તં જિતવિષયગણં દીર્ઘબન્ધું દયાલું
સ્ખાલિત્યે શાસિતારં સ્વપરહિતપરં દેશિકં ભૂષ્ણુરીપ્સેત્ ॥ ૧॥

અજ્ઞાનધ્વાન્તરોધાદઘપરિહરણાદાત્મસામ્યાવહત્વાત્
જન્મપ્રધ્વંસિ જન્મપ્રદગરિમતયા દિવ્યદૃષ્ટિપ્રભાવાત્ ।
નિષ્પ્રત્યૂહાનૃશંસ્યાન્નિયતરસતયા નિત્યશેષિત્વયોગાત્
આચાર્યઃ સદ્ભિરપ્રત્યુપકરણધિયા દેવવત્ સ્યાદુપાસ્યઃ ॥ ૨॥

સદ્ભુધ્દિઃ સાધુ સેવી સમુચિતચરિતસ્તત્વબોધાભિલાષી
શુશ્ૃષુસ્ત્યક્તમાનઃ પ્રણિપતનપરઃ પ્રશ્નકાલપ્રતીષઃ ।
શાન્તો દાન્તોઽનસૂયુઃ શરણમુપગતઃ શાસ્ત્રવિશ્વાસશાલી
શિષ્ય પ્રાપ્તઃ પરીક્ષાં કૃતવિદભિમતં તત્ત્વતઃ શિક્ષણણીયઃ ॥ ૩॥

સ્વાધીનાશેષસત્તા સ્થિતિયતનફલં વિદ્ધિ લક્ષ્મીશમેકં
પ્રાપ્યં નાન્યં પ્રતીયા ન ચ શરણતયા કઞ્ચિદન્યં વૃણીયાઃ ।
એતસ્માદેવ પુંસાં ભયમિતરદપિ પ્રેક્ષ્ય મોજ્ઝીસ્તદઽજ્ઞાં
ઇત્યેકાન્તોપદેશઃ પ્રથમમિહ ગુરોરેકચિત્તેન ધાર્યઃ ॥ ૪॥

મોક્ષોપાયાર્હતૈવં ભવતિ ભવભૃતાં કસ્યચિત્ ક્વાઽપિ કાલે
તદ્વદ્ ભક્તિપ્રપત્ત્યોરધિકૃતિ નિયમસ્તાદૃશા સ્યાન્નિયત્યા ।
શક્તાશક્તાદિ તત્તત્પુરુષવિષયતઃ સ્થાપ્યતે તદ્વ્યવસ્થા
યચ્ચાહુસ્તદ્વિકલ્પઃ સમ ઇતિ કતિચિત્ તત્ ફલસ્યાવિશેષાત્ ॥ ૫॥

સાનુક્રોશે સમર્થે પ્રપદનમૃષિભિઃ સ્મર્યતેઽભીષ્ટસિદ્ધ્યૈઃ

લોકેઽપ્યેતત્ પ્રસિદ્ધં ન ચ વિમતિરિહ પ્રેખ્્શ્યતે ક્વાઽપિ તન્ત્રે ।
તસ્માત્ કૈમુત્ય સિદ્ધં ભગવતિ તુ ભરન્યાસવિધાનુભાવમ્
ધર્મસ્થેયાઃ ચ પૂર્વે સ્વકૃતિષુ બહુધા સ્થાપયાંચક્રુરેવમ્ ॥ ૬॥

શાસ્ત્રપ્રમાણ્યવેદી નનુ વિધિવિષયે નિર્વિશઙ્કોઽધિકારી
વિશ્વાસસ્યાઙ્ગભાવે પુનરિહ વિદુષા કિં મહત્વં પ્રસાધ્યમ્ ।
મૈવં ઘોરાપરાધરિઃ સપદિ ગુરુફલે ન્યાસમાત્રેણ લભ્યે
શઙ્કા પાર્ષ્ણિ ગ્રહાર્હા શમયિતુમુચિતા હેતુભિસ્તત્તદર્હૈ ॥ ૭॥

નેહાભિક્રાન્તિ નાશો ન ચ વિમતિરિહ પ્રત્યવાયો ભવેદિતિ
ઉક્તં કૈમુત્ય નીત્યા પ્રપદનવિષયે યોજિતં શાસ્ત્રવિદ્ભિઃ ।
તસ્માત્ ક્ષેત્રે તદર્હ સુવિદિતસમયૈર્દેશિકૈઃ સમ્યગુપ્તં
મન્ત્રાખ્યં મુક્તિબીજં પરિણતિ વશતઃ કલ્પતે સત્ફલાય ॥ ૮॥

ન્યાસઃ પ્રોક્તોઽતિરિક્તં તપ ઇતિ કથિતઃ સ્વધ્વરશ્ચાસ્ય કર્તા
અહિર્બુધ્યોપ્યન્વવાદીદગણિ દિવિષદામુત્તમં ગુહ્યમેતત્ ।
સાક્ષાન્મોક્ષાય ચાસૌ શ્રુત ઇહ તુ મુધા બાધ શઙ્કા ગુણાઢ્યે
તન્નિષ્ટો હ્યન્યનિષ્ઠાન્ પ્રભુરતિશયિતું કોટિકોટ્યંશતોઽપિ ॥ ૯॥

નાનાશબ્દાદિભેદાદિતિ તુ કથયતા સૂત્રકારેણ સમ્યક્
ન્યાસોપાસે વિભક્તે યજનહવનવચ્છબ્દભેદાદભાક્તાત્ ।
આખ્યા રૂપાદિભેદઃ શ્રુત ઇતરસમઃ કિઞ્ચ ભિન્નોઽધિકારઃ
શીઘ્રપ્રાપ્ત્યાદિભિઃ સ્યાજ્જગુરિતિ ચ મધૂપાસનાદૌ વ્યવસ્થામ્ ॥ ૧૦॥

યત્કિઞ્ચિદ્રક્ષણીયં તદવન નિપુણે ન્યસ્યતોઽકિઞ્ચનસ્ય
પ્રસ્પષ્ટં લોકદૃષ્ટ્યાઽપ્યવગમિત ઇહ પ્રાર્થનાદઙ્ગયોગઃ ।
તસ્માત્ કર્માઙ્ગકત્વં વ્યપનયતિ પરાપેક્ષણાભાવવાદઃ
સાઙ્ગે ત્વષ્ટાઙ્ગયોગવ્યવહૃતિ નયતઃ ષડ્વિધત્વોપચારઃ ॥ ૧૧॥

પઞ્ચાપ્યઙ્ગાન્યભિજ્ઞાઃ પ્રણિજગુરવિનાભાવ ભાઞ્ચિ પ્રપત્તેઃ
કૈશ્ચિત્ સંભાવિતત્વં યદિહ નિગદિતં તત્ પ્રપત્ત્યુત્તરં સ્યાત્ ।
અઙ્ગેષ્વઙ્ગિત્વવાદઃ ફલકથનમિહ દ્વિત્રિમાત્રોક્તયશ્ચ
પ્રાશસ્ત્યં તત્ર તત્ર પ્રણિદધતિ તતઃ સર્વવાક્યૈકકણ્ઠ્યમ્ ॥ ૧૨॥

રક્ષોપેક્ષા સ્વસાહ્ય પ્રણયવતિ ભરન્યાસ આજ્ઞાદિ દક્ષે
દૃષ્ટા નાઽત્ર પ્રપત્તિ વ્યવહૃતિરિહ તન્મેલને લક્ષણં સ્યાત્ । var તન્મેલનં
ગેહાગત્યદિ માત્રે નિપતતુ શરણાગત્યભિખ્યોપચારાત્

યદ્વાનેકાર્થભાવાદ્ભવતિ ચ વિવિધઃ પાલનીયત્વહેતુઃ ॥ ૧૩ ॥ var યદ્વા નૈકાર્થં, હિ

આત્માત્મીયસ્વરૂપન્યસનમનુગતં યાવદર્થં મુમુખ઼્શોઃ
તત્ત્વજ્ઞાનાત્મકં તત્ પ્રથમમથ વિધેઃ સ્યાદુપાયે સમેતમ્ ।
કૈઙ્કર્યાખ્યે પુમર્થેઽપ્યનુષજતિ તદપ્યર્થના હેતુભાવાત્
સ્વાભીષ્ટાનન્યસાધ્યાવધિરિહ તુ ભરન્યાસભાગોઽઙ્ગિભૂતઃ ॥ ૧૪ ॥

ન્યસાદેશેષુ ધર્મત્યજનવચનતોઽકિઞ્ચનાધિક્રિયોક્તા
કાર્પણ્યમ્ વાઽઙ્ગમુક્તં ભજનવદિતરાપેક્ષણં વાઽપ્યપોઢમ્ ।
દુઃસાધેચ્છોદ્યમૌ વા ક્વચિદુપશમિતવન્યસંમેલને વા
બ્રહ્માસ્ત્રન્યાય ઉક્તસ્તદિહ ન વિહતો ધર્મ આજ્ઞાદિ સિદ્ધઃ ॥ ૧૫ ॥

આદેષ્ટું સ્વપ્રપત્તિં તદનુગુણગુણાદ્યન્વિતં સ્વં મુકુન્દો
મામિત્યુક્ત્વૈકશબ્દં વદતિ તદુચિતં તત્ર તાત્પર્યમૂહ્યમ્ ।
તત્પ્રાપ્ય પ્રાપકૈક્યં સકલફલદતાં ન્યાસતોઽન્યાનપેક્ષામ્
પ્રાધાન્યાદ્યં ચ કિઞ્ચિત્ પ્રથયતિ સ પરં શ્રીસખે મુક્ત્યુપાયે ॥ ૧૬ ॥

સ્વાભીષ્ટપ્રાપ્તિહેતુઃ સ્વયમિહ પુરુષૈઃ સ્વીકૃતઃ સ્યાદુપાયઃ
શાસ્ત્રે લોકે ચ સિદ્ધઃ સ પુનરુભયથા સિદ્ધસાધ્યપ્રભેદાત્ ।
સિદ્ધોપાયસ્તુ મુક્તૌ નિરવધિકદયઃ શ્રીસખઃ સર્વશક્તિઃ
સાધ્યોપાયસ્તુ ભક્તિર્ન્યસનમિતિ પૃથક્ તદ્વશીકારસિદ્ધ્યૈ ॥ ૧૭ ॥

અત્યન્તાકિઞ્ચનોઽહં ત્વદપચરણતઃ સન્નિવૃત્તોઽદ્ય નાથ
ત્વત્સેવૈકાન્તધીઃ સ્યાં ત્વમસિ શરણમિત્યધ્યવસ્યામિ ગાઢમ્ ।
ત્વમ્ મે ગોપાયિતા સ્યાસ્ત્વયિ નિહિતભરઓઽસ્મ્યેવમિત્યર્પિતાત્મા
યસ્મૈ સ ન્યસ્તભારઃ સકૃદથ તુ સદા ન પ્રયસ્યેત્ તદર્થમ્ ॥ ૧૮ ॥ var સકૃદિતિ તુ

ત્યક્ત્વોપાયાનપાયાનપિ પરમજહન્મધ્યમાં સ્વાર્હવૃત્તિમ્
પ્રાયશ્ચિત્તં ચ યોગ્યં વિગતઋણતતિર્દ્વન્દ્વવાત્યાં તિતિક્ષુઃ ।
ભક્તિજ્ઞાનાદિવૃદ્ધિં પરિચરણગુણાન્ સત્સમૃદ્ધિં ચ યુક્તાં var યુક્ત્યા
નિત્યં યાચેદનન્યસ્તદપિ ભગવતસ્તસ્ય યદ્વાઽઽપ્તવર્ગાત્ ॥ ૧૯ ॥

આજ્ઞા કૈઙ્કર્યવૃત્તિષ્વનઘ ગુરુજનપ્રક્રિયા નેમિવૃત્તિઃ
સ્વાર્હાનુજ્ઞાતસેવા વિધિષુ ચ શકને યાવદિષ્ટં પ્રવૃત્તઃ ।
કર્મપ્રારબ્ધકાર્યં પ્રપદનમહિમધ્વસ્તશેષં દ્વિરૂપં
ભુક્ત્વા સ્વાભીષ્ટકાલે વિશતિ ભગવતઃ પાદમૂલં પ્રપન્નઃ ॥ ૨૦ ॥

શ્રુત્યા સ્મૃત્યાદિભિશ્ચ સ્વયમિહ ભગવદ્વાક્યવર્ગૈશ્ચ સિદ્ધાં
સ્વાતન્ત્ર્યે પારતન્ત્ર્યેઽપ્યનિતરગતિભિઃ સદ્ભિરાસ્થીયમાનામ્ ।
વેદાન્તાચાર્ય ઇત્થં વિવિધગુરુજનગ્રન્થસંવાદવત્યા
વિંશત્યા ન્યાસવિદ્યાં વ્યવૃણુત સુધિયાં શ્રેયસે વેઙ્કટેશઃ ॥ ૨૧॥

સંસારાવર્તવેગપ્રશમનશુભદૃગ્દેશિક પ્રેક્ષિતોઽહં
સંત્યક્તોઽન્યૈર્ ઉપાયૈરનુચિતચરિતેષ્વદ્ય શાન્તાભિસન્ધિઃ ।
નિઃશઙ્કસ્તત્વદૃષ્ટ્યા નિરવધિકદયં પ્રાર્થ્ય સંરક્ષકં ત્વાં var પ્રાપ્ય
ન્યસ્ય ત્વત્પાદપદ્મે વરદ નિજભરં નિર્ભરો નિર્ભયોઽસ્મિ ॥ ૨૨॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

ન્યાસવિંશતિ વ્યાખ્યા

શ્રીમન્નિગમાન્તમહાદેશિકેઃ સ્વયમનુગૃહીતા ન્યાસવિંશતિ વ્યાખ્યા

શ્રીઃ

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

શ્રુતિસ્મૃત્યાદિતાત્પર્યં નિરૂઢા ન્યાસવિંશતિઃ ।
સ્વય વ્યાક્રિયતેઽસ્માભિઃ દિઙ્માત્રેણ સદિચ્છયા ॥

NOTE: In this commentary, there are many boldface entries (from the main
stotra) which are placed inside flower/curly brackets in the encoded text.
as text in bold font
- for easy identification.  This is not visible in the processed
Devanagari file or in other scripts.

પ્રપત્ત્યાદ્યપરપર્યાયાં (var પ્રપત્યપરપર્યાયાં ) ન્યાસવિદ્યાં
સઞ્જિઘૃક્ષુઃ પ્રથમં તત્ત્જ્ઞાનાદિમુખેન તદધિકાર-
હેનુભૂતમાચાર્યસંગ્રહણમાહ (var સઞ્જિવૃક્ષુઃ તત્ત્વજ્ઞાનાદિ
. . . સંગ્રહણમાહ)   – સિદ્ધમ્  ઇતિ ।

એતેષામાચાયગુણાનાં પ્રમાણાનિ “તદ્વિજ્ઞાનાર્થં સ
ગુરુમેવાભિગચ્છેત્  સમિત્પાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠં”

ઇત્યાદીનિ (var ઇત્યાદીનિ દ્રષ્ટવ્યાનિ ।) । શ્રોત્રિયં - શ્રુતવેદાન્તમ્ । સમયાનિયતયા - યથાકાલં પ્રવૃત્તયા; યદ્વા ધર્મજ્ઞસમયવ્યવસ્થિતયા । જિતવિષયગણં - સ્વવશેન્દ્રિયવર્ગમ્ । સમ્યક્ જ્ઞાનાર્થતયા ગુર્વભિગમનેઽપિ સ્વેચ્છયા પ્રવર્તમનસ્ય (var પ્રવૃત્તસ્ય) નિયમાંશમાત્રે વિધિરિતિ જ્ઞાપનાર્થમ્ (var વિધિજ્ઞાપનાર્થં) ઈપ્સેત્ ઇતિ "સન્ પ્રયોગઃ" ॥ ૧॥

"આચાર્યવાન્ પુરુષો વેદ", " આચાર્યાદ્ધૈવ વિદિતા વિદ્યા સાધિષ્ઠં દ્દ રાપત્ ", "આચાર્યવત્તયા મુક્તૌ" (var પ્રાપત્ " આચાર્યવત્તયા મોક્ષમામનન્તિ ... મુક્તૌ ઇત્યાદ્યનુસરતઃ આચાર્યવરેણ સિદ્ધે, 'દેવમિવ) ઇત્યાદિપ્રમાણાનુસારતઃ આચાર્યવરણે સિદ્ધે, "આચાર્યદેવો ભવ", "દેવમિવાચાર્યમુપાસીત" ઇત્યાદિવિહિતં તત્સેવનમાહ - અજ્ઞાનધ્વાન્ત ઇતિ ।

અત્ર ઉક્તા હેતવઃ આચાર્યે ભગવતિ ચ અન્વીયન્તે ।જન્મપ્રધ્વંસિજન્મ - વિદ્યાજન્મ । "બ્રહ્મવ્દિયાપ્રદાનસ્ય દેવૈરપિ ન શક્યતે । પ્રતિપ્રદાનમથવા દદ્યાચ્છાક્તિત આદરાત્ ॥ " ઇચ્ચભિપ્રેય અપ્રત્યુપકરણધિયા ઇત્યુક્તમ્ ॥ ૨॥

સમ્યગુપસન્નેં સચ્છિષ્યે " તસ્મૈ સ વિદ્વાન્" ઇત્યાદિવિહિતમચાર્યકૃત્યમાહ - સદ્બુદ્ધિઃ ઇતિ ।

અભિમતં - મોક્ષોપયુક્તમર્થજાતમ્ (var ઇદં ન દૃશ્યતે) ॥ ૩॥

મુક્તિકામસ્ય મૂલમન્ત્રાદ્યભિભિધેયતયા શિક્ષણીયેઽથ પ્રધાનાંશં, તસ્ય ચ નિત્યાનુ- સન્ધેયત્વમાહ (var મૂલમન્ત્રાદ્યભિપ્રેતતયા શિક્ષણીયે પ્રધાનૃંશં તસ્ય નિત્યત્વં ચાહ ) - સ્વાધીન ઇતિ ॥ ૪॥

ઈદૃશોપદેશલબ્ધસમ્યગ્જ્ઞાનસ્ય પુરુષસ્ય "અનિત્યમસુખં લોકમિમં પ્રાપ્ય ભજસ્વ મામ્", " મામેકં શરણં વ્રજ" ઇત્યાદિભિરપવર્ગોપાયતયા વિહિતયોઃ ભક્તિપ્રપત્ત્યોઃ અધિકારિવ્યવસ્થામાહ (var અધિકારવ્યવસ્થા) - મોક્ષોપય ઇતિ ॥ ૫॥

ઇત્થમધિકારિભેદાત્ ગુરુલઘુવિકલ્પસંભવેઽપિ

પ્રપત્તિપ્રભાવે દુર્બ્બુદ્ધીન્ પ્રયાયયતિ – સાનુક્રોશ ઇતિ ।
વાનરવાયસરાક્ષસદ્રૌપદીગજેન્દ્રસુમુખત્રિશઙ્કુશુનશ્શેફાદ્યુપખ્યનૈઃ
ઇતિ શેષઃ । ધર્મસ્થેયાઃ - વિબાદગોચરધર્મનિર્ણેતારઃ । પૂર્વે
- ભગવદ્યામુનાદયઃ ॥ ૬॥

સર્વશાસ્ત્રસાધારણો વિશ્વાસઃ, તસ્ય પ્રપત્તિલક્ષણવાક્યે મહત્ત્વેન
વિશેષણં કિમર્થમ્ ? ઇત્યનુભાષ્ય પરિહરતિ– શાસ્ત્રપ્રામાણ્ય
ઇતિ ।
અત્ર અર્થસ્વભાવેન શઙ્કાપ્રકર્ષસંભવાત્ તન્નિવૃત્યૈ
" વિદિતઃ સ હિ ધર્મજ્ઞઃ", " મિત્રભાવેન
સંપ્રાપ્તમ્", "સકૃદેવ પ્રપન્નાય"
ઇત્યાદિપ્રસિદ્ધશરણ્યગુણવિશેષાદિપરામર્શભૂમ્ના (var
ઇત્યદ્દ્ફ઼િ઼િશરણ્યગુણવિશેષદિ વિમર્શભૂતમહવિશ્વાસાદિપ્રકર્ષઃ)
વિશ્વાસપ્રકર્ષઃ )સંપાદ્ય ઇતિ ભાવઃ ॥ ૭॥

કિમીદૃશવિશ્વાસસાપેક્ષતયા (var કિમીદૃશવિશ્વાસાપેક્ષયા)
ગુરુતરયા પ્રપત્ત્યા ? " સકૃજ્જપ્તેન મન્ત્રેણ કૃતકૃત્યઃ
સુખી ભવેત્", " પ્રપત્તિવાચૈવ નિરીક્ષિતું વૃણે",
ઇયાદિપ્રમાણસંપ્રદાયૈઃ મુક્તિઃ સિદ્ધ્યેદિત્યત્રાહ (var સિદ્ધ્યેદિત્યાહ)
- નેહાભિક્રાન્તિનાશ ઇતિ । ઉક્તમ્ - કર્મયોગપ્રકરણે
(var કર્મયોગાધિકારે) ઇતિ શેષઃ । "સકૃદુચ્ચરિતં યેન
હરિરિત્યક્ષરદ્વયમ્" ઇત્યાદિ ન્યાયેન અત્ર મન્ત્રોચ્ચારણાદિકં
તન્મુખેનૈવ મુક્તિં સાધયતિ । યથોક્તં સત્યકિતન્ત્રે (var
સાત્વતતન્ત્રે) "અનેનૈવ તુ મન્ત્રેણ સ્વાત્માનં મયિ નિક્ષિપેત્ ।
મયિ નિક્ષિપ્તકર્તવ્યઃ કૃતકૃત્યો ભવિષ્યાતિ" – ઇતિ ॥ ૮॥

નનુ એવં પ્રપત્તિરપિ ભક્તિયોગદ્વારેણૈવ મુક્તિહેતુઃ સ્યાત્
ઇત્યાશઙ્કાયાં, " મુમુક્ષુર્વૈ શરણમહં પ્રપદ્યે" ઇતિ
શ્રુતિસ્વારસ્યસિદ્ધમવ્યવહિતમોક્ષસાધનત્વં વ્યઞ્જકાન્તૈરપિ
(var વ્યઞ્જકાન્તરેણાપિ) દ્રઢયપિ - પ્રોક્તઃ। -
"તસ્માન્ન્યાસમેષાં તપસામતિર્ક્તમાહુઃ" ઇતિ વાક્યેન ।
કાથિતઃ - "યઃ સમિધા " ઇત્યારભ્ય; "યો નમસા સ
સ્વધ્વરઃ" ઇત્યૃગંશેન (var ઇતન્તેન ઋગંશેન, ...
ઈશાનોઽન્વભાષત ।) । અન્વવાદીત્ - ઋગર્થમન્વભાષત । યથા

“સમિત્સાધનકાદીનાં યજ્ઞાનાં ન્યાસમાત્મનઃ । નમસા યોઽકરોદ્ દેવે સ સ્વધ્વર ઇતીરિતઃ ।” ઇતિ । અગણિ દિવિષદામુત્તમં ગુહ્યમેતત્ - “એતદ્વૈ મહોપનિષદં દેવાનાં ગુહ્યમ્” ઇત્યાદિશ્રુત્યા । તન્નિષ્ઠઃ ઇત્યાદિના “સત્કર્મનિરતાઃ શુદ્ધાઃ” ઇત્યાદ્યુક્ત પ્રપન્ન પ્રભાવો વિવૃતઃ । યદ્યપિ “ઓમિત્યાત્માનં યુઞ્જીત” ઇતિ પ્રણવકરણકો ન્યાસઃ શ્રુતઃ, તથાઽપિ તદનર્હાણાં તદ્વિરહેઽપિ તન્ત્રોક્તપ્રકારેણ (var તન્ત્રોક્તપ્રકરોઽત્ર, તત્રોક્તપ્રકારેણ, તત્પ્રયોગોત્ર) તત્પ્રયોગો યુજ્યતે ઇત્યભિપ્રાયેણ તન્નિષ્ઠ ઇતિ સામાન્યોક્તિઃ । શ્રુતિસિદ્ભેઽપિ પ્રપદને સામાન્ય ધર્મભૂત સત્યવચનાદિ નયાત્ સર્વાધિકારત્વં ચ ન વિરુદ્ધમ્ । “સર્વસ્ય શરણં સુહૃત્” (var સુહત્” ઇત્યાદ્યભિપ્રેતં) । ઇત્યાદિષ્વેતદભિપ્રેતમ્ ॥ ૯॥

સન્તુ ભાષ્યોક્ત પ્રત્ત ભવત્યઙ્ગભૂત પ્રપત્તિ પ્રશંસાપરાણિ એતાનિ વાક્યાનિ, ગુણોપસંહારપાદે પ્રપત્તેઃ સ્વતન્ત્ર વિદ્યાત્વ સ્થાપનાભાવાત્, અનન્યથાસિદ્ધ સમાન ન્યાયાભાવાચ્ચ (var અનન્યથા સિદ્ધસામાન્યન્યાયભાવાચ્ચ) ઇતિ શઙ્કાયાં, પ્રપદનસ્ય મોક્ષં પ્રતિ પૃથગુપાયત્વોપપાદનં તત્રૈવ સુસ્પષ્ઠમિયાહ – અભાક્તાત્ - અનૌપચારિકાત્ ઇત્યર્થઃ । સદ્વિદ્યા દહર વિદ્યાદિષુ શબ્દ ભેદો હિ તત્તદ્ગુણવિશિષ્ઠ બ્રહ્મ વિષય પ્રત્યયાવૃત્ત્યભિધાયિત્વ (var બ્રહ્મવિષયપ્રત્યયાવૃત્ત્યભિધાયિ) રૂપણોપપાદ્યઃ; ઇહ તુ યાગ દાન હોમાદિવત્ અપર્યાયતયૈવ વ્યુત્પત્તેઃ સિદ્ધઃ (var ઉત્પત્તેઃ સિદ્ધિ) ઇતિ ભાવઃ । ન્યાસવિદ્યા ઇતિઆખ્યા । અર્થસ્વભાવાદત્ર અભિમત પ્રદાન સામર્થ્ય વિશિષ્ઠ પર નિરપેક્ષ રક્ષકત્વં (var અભયપ્રદાનસામર્થ્યવિશિષ્ટપરમકારુણિકતયા) રૂપમ્ । આદિ શાબ્દેન પરિકરપ્રકરણયોઃ ગ્રહણમ્ । ઇતરસમઃ - વિદ્યાન્તરસમઃ । કિં ચ ઇત્યાદિના પ્રાગ્દરિતાધિકારિ ભેદ સ્મારણમ્ (var કિં ચેત્યાદિ પ્રાગ્દર્શિતધિકારિભેદસ્મારણમ્ । ભાષ્યે તુ પ્રપત્તેઃ . . .) ) । સ્વાતન્ત્ર્યેણ મોક્ષોપાયત્વેન વ્યાવૃત્ત ઇહાધિકારો ન સ્યાદિતિ શઙ્કાયાં મધુવિદ્યાદ્યુદાહરણમ્ । ભાષ્યે તુ પ્રપત્તેઃ ભક્ત્યઙ્ગત્વોક્તિઃ ન સ્વાતન્ત્ર્ય બાધિકા; વિષય ભેદાદુભયાકારયોગિષુ (var સ્વાતન્ત્ર્યવિષયબાધિક,

. . . ઉભયાધિકારયોગિષુ) ક્વચિદન્યતરોક્તરવિરોધ્હાત્ ॥ ૧૦॥

અઙ્ગત્વમેવ પ્રપત્તેઃ ઇતિ પક્ષઃ પરિહૃતઃ । અથ સ્વાતન્ત્ર્યેઽપિ નિરઙ્ગકત્વપક્ષં પરિહરતિ – અવગમિતઃ - “તદેકોપાયતા યાચ્ઞા પ્રપત્તિઃ”, “અપ્રાધિતો ન ગોપાયેત્”, “શરણં ચ પ્રપન્નાનામ્” ઇત્યાદિભિઃ ઇતિ શેષઃ । તસ્માત્ ઇત્યાદિના “પ્રપત્તેઃ કવચિદપ્યેવં પરાપેક્ષા ન વિદ્યતે” ઇત્યસ્ય નિર્વિષયત્વ (var નિરઙ્ગકત્વ) શઙ્કાવ્યુદાસઃ । તથા “ષડ્વિધા શરણગતિઃ” ઇતિ વચનાત્ આગ્નેયદિ ષટ્કવત્ આનુકૂલ્ય સઙ્કલ્પાદિ ષટ્કં સંભૂય એકં કારણં સ્યાદિત્યત્રોત્તરમ્ – સાઙ્ગે તુ ઇત્યાદિ । “ન્યાસઃ પઞ્ચાઙ્ગસંયુતઃ” ઇતિ વ્યવસ્થાપકવચનાનુગુણમઙ્ગાઙ્ગિભાવ સમુચ્ચયેન ષડ્વિધત્વ વચનં નેયમિતિ ભાવઃ ॥ ૧૧॥

એવમઙ્ગાઙ્ડગિભાવઃ સિદ્ધઃ । તત્ર અવાન્તર્સવૈયાકુલીં શમયતિ – પ્રપત્તિદશાયાં પ્રાતિકૂલ્યવર્જનાદ્યભાવે સાઙ્ગસ્યોપાયસ્ય વૈકલ્યં સ્યાત્ । પશ્ચાત્ તુ પ્રાતિકૂલ્યસ્ય સમ્ભવેઽપિ કૃતસ્યોપાયસ્ય ન વૈકલ્યમ્; કિતુ પ્રત્યવાય પરિહારાર્થં યથાર્હ પ્રતિવરિધાનમેવ કાર્યમ્ । “તથા પુંસામાવિસ્રમ્ભાત્ પ્રપત્તિઃ પ્રચ્યુતા ભવેત્” ઇત્યેતદપિ તાત્કાલિક વિસ્રમ્ભ વૈકલ્યાભિપ્રાયમ્ । ઉત્તરકાલે સતોઽપિ વિશ્વાસસ્ય પૂર્વત પ્રપત્યઙ્ગત્વાભાવેન તદ્વિરહે । એવં ચ બ્રહ્માસ્ત્ર ન્યાય દૃષ્ટાન્તઃ અપ્યત્ર યોગ્યાંશો સ્થાપ્યઃ, અન્યથા અતિપ્રસઙ્ગાત્ । એતેન “ઉપાયાપાયસંયોગે નિષ્ઠયા હીયતેઽનયા” ઇત્યેતદપિ ગતાર્થમ્, તત્કાલિકોપાયાપાય સંયોગસ્ય પ્રપત્તિવિરોધિત્વે તાત્પર્યાત્ । ન ચ આનુકૂલ્યસઙ્કહ્પસ્ય અઙ્ગેન શ્રવણાત્ સઙ્કલ્પિતકરણમપ્યઙ્ગં, તથા શ્રુત્યભાવાત્ યથાશ્રુતિ સઙ્કલ્પિતાચરનસ્ય અઙ્ગત્વકલ્પનાનુપપત્તેશ્ચ । અકૃત્યકરણ સ્વતન્ત્રવિધેરેવ સિધ્યતિ ઇતિ નોપપ્લવાવકાશઃ । । “ આનુકૂલ્યે (var સઙ્કલ્પિતકરણસ્ય અઙ્ગત્વકલ્પનાનુપપત્તેશ્ચ । આનુકૂલ્યેતરા) તરાભ્યાં તુ વિનિવૃત્તિરપયતઃ” ઇત્યનેનાપિ અપાયનિવૃત્તૌ સઙ્કલ્પાદિવિશેપસ્ય તાત્કાલિકોપયોગઃ પ્રદર્શ્યતે (var પ્રદૃશ્યતે) । અત્ર આનુકૂલ્યશબ્દો હિ તત્સઙ્કલ્પપ્રતિપાદ્નપરઃ, “આનુકૂલ્યસ્ય સઙ્કલ્પઃ” ઇત્યાદિ સિદ્ધાનુવાદાત્ (var

ઇત્યાદિ સિધ્ધાનુવદત્વાત્) । ન ચ “ઉપાયાપાય” ઇત્યાદૌ પ્રપત્તિનિષ્ઠાહાનિર્વિવક્ષિતા । કિન્તુ ઉપાયાપાય ત્યાગ વિશિષ્ટ મધ્યમ વૃત્તિહાનિઃ । વિશેષણાભવેઽપિ હિ વિશિષ્ટાભાવઃ સિધ્યતિ । અત એવ હિ તત્ર “અપાયસંપ્લવે સદ્યઃ પ્રાયશ્ચિત્તં સમાચરેત્” ઇત્યાદિના તાવન્માત્રનિમિત્તં પ્રાયશ્ચિત્તમેવ વિધીયતે । ન તુ પૂર્વકૃતાં પ્રપત્તિં પ્રચ્યુતામભિપ્રેય તત્ફલાર્થે પુનઃ પ્રપત્તિઃ। ૧૨॥

પ્રસ્તુત મુખ્યોપચર પ્રયોગ વ્યવસ્થપનાય પ્રપત્તિલક્ષણં શોધયતિ – પ્રણયોઽત્ર યાચ્ઞા । આજ્ઞા - આજ્ઞાકરણમ્ । આદિશબ્દેન ભૃતિદાનાદિસઙ્ગ્રહઃ । અનેકાર્થભાવાત્ - શરણશબ્દસ્ય અનેકાર્થરૂઢત્વાદિત્યર્થઃ । પ્રપદનરૂપત્વાભાવેઽપિ કેષાઞ્ચિત્ ગૃહાગમનાદીનાં રક્ષ્યતાહેતુત્વં પ્રસિદ્ધમિત્યાભેપ્રેત્ય ભવતિ ચ ઇત્યાદિકમુક્તમ્ ॥ ૧૩॥

એવં લૌકિક વૈદિક સર્વપ્રપત્તીનાં સાધારણરૂપમુક્તમ્ । (var સાધારણરૂપત્વમુક્તમ્) । અથ મોક્ષૈકપ્રયોજનાયાં પ્રપત્તૌ સર્વનિવૃત્તિ ધર્મસાધારણં સ્વાભાવિક પરશેષત્વાનુસન્ધાનાદિરૂપં વિશેષમાહ – આત્મીયં ઉપાયફલાદિ । આત્મા ચ આત્મીયાશ્ચેતિ યાવન્તઃ અર્થાઃ સન્તિ પ્રમાણસિદ્ધાઃ તાવતાં સર્વેષાં ભગવચ્છેષત્વાનુસન્ધાનં કાર્યમ્ । તચ્ચાનુસન્ધ્રાનમુપાયદશયામપિ નિવૃત્તિધર્મવિધિસ્વાભાવ્યાદનુવર્તતે । ઇહ ચામુત્ર ચ સ્વયમ્પ્રયોજને કૈઙ્કર્યે સ્વત એવ ભવતિ । અઙ્ગિભૂતભરન્યાસાંશસ્તુ ન યાવદર્થે; કિન્તુ યથાલોકં યાવદનન્યસાધ્યં સ્વાભીષ્ટં તાવત્યેવ ભવતીત્યર્થઃ ॥ ૧૪॥

સર્વશક્તૌ ભરં ન્યસ્યતઃ સર્વેધર્મત્યાગવચનાત્ વર્ણાશ્રમાદિધર્મરૂપમાજ્ઞાકૈઙ્કર્યં તદનુવિદ્ધમનુજ્ઞાકૈઙ્કર્યં ચ ન સ્યાતામિત્યત્રાહ – ક્વચિત્ – ચાપલાત્ અશક્યપ્રવૃત્તે કસ્મિંશ્ચિદધિકારિણિ । અન્યસમ્મેલને - પ્રપત્ત્યઙ્ગવ્યતિરિક્તાનાં તદર્થતયા સ્વીકૃતૌ । તત્ - તસ્માત્ ધર્માણાં સ્વરૂપત્યાગસ્ય પ્રપત્યઙ્ગત્વભાવાત્ તેષાં પ્રપત્યઙ્ગત્વેનાનુપાદાનાચ્ચ (var તસ્માત્ દત્તઃ સર્વધર્માણાં . . . પ્રપથ્યર્થત્વેનાપ્રતિપાદનાચ્ચ) ઇત્યર્થઃ । સર્વધર્મત્યાગવચનસ્ય અત્ર સર્વાર્વિરુદ્ધેષુ

અર્થાન્તરેષુ સમ્ભવત્સુ તદ્વિપરીતાર્થકલ્પનં ન યુક્તમિતિ ભાવઃ ।
એતેન અલેપકાદિપક્ષાશ્ચ પ્રતિક્ષિપ્તાઃ ॥ ૧૫॥

નનુ યદિ પ્રપત્તિરુપાયઃ સ્યાત્ તદા હિ તસ્યા અઙ્ગત્વં, કેચિદઙ્ગત્વં
ચ (var અઙ્ગિત્વં તુ) વક્તવ્યમ્ । સા તુ તત્તદ્વાક્યેષુ
ઉપાયતયોક્તસ્ય શરણ્યસ્ય વિશેષણતયા પ્રયુક્તૈરેકાદિશબ્દૈઃ
(var પ્રયુક્તૈરેકશબ્દૈઃ) ઉપાયબુદ્ધ્યર્હત્વેન (var
એકોપાયબુદ્ધ્યનર્હત્વેન) વ્યવચ્છિદ્યતે
(var વ્યવહ્નિયતે) । તસ્માત્ પૂર્વોક્તં સર્વમયુક્તમિત્યત્રાહ –
તત્ - વિધ્યનુરોધેન નેતવ્યત્વાત્ ઇતિ ભાવઃ । અન્યથાઽપ્યુપપન્નં
સિદ્ધોપાયસ્યૈક્યં પ્રપત્તેઃ તત્પ્રસાદોપાયત્વં ન વિરુન્ધ્યાદિતિ ભાવઃ ।
એતેન નિર્વિશાદ્વૈતદ્બુધ્દિ (var એવં નિર્વિશેશા ( text not
legible here in the original ) નિરસ્તાઃ (var એવં નિર્વિશેષા)
વેદિતન્યાઃ ॥ ૧૬॥

ઉક્તાર્થસ્થિરીકરણાય સામાન્યત ઉપાયશબ્દાથ (વિદ્બૃણ્વન્)
સિદ્ધસાધ્યોપાયવિશેષૌ તત્પ્રયોજનં ચ વિભજતે – સમર્થિતમેવ
સાઙ્ગભરન્યાસં યથાવદનુષ્ટનાય મુખભેદેન શિક્ષયન્
તદ્વિષયકર્તવ્યશેષં નાસ્તીત્યાહ– યસ્મૈ પ્રયોજનાય
ઇતિ શેષઃ । સકૃત્ ઇત્યનેન ઉપાસનવદ્બૃત્તિસાપેકષત્વં
(var ઉપાસનવદસ્યાવૃત્તિ) નાસ્તીત્યુચ્યતે । “સકૃત્ કૃતઃ
શાસ્રાર્થઃ” ઇત્યસ્યાન્નાપવાદો નાસ્તિ । પ્રત્યુત “સકૃદેવ”
ઇત્યાદિભિઃ અનુગ્રહ એવ । સદા – યાવત્ફલપ્રાપ્તીત્યર્થઃ ॥ ૧૭॥

નનુ ન્યાસનિષ્ઠમેવ “તસ્યૈવં વિદુષઃ” ઇતિ
પરામૃશ્ય, તત્કર્તવ્યત્વેન પુરુષવિદ્યાઽઽમ્નાતા । સા ચ
“યન્મરણં તદવભૃથઃ” ઇત્યન્તા યજ્ઞદૃષ્ટિરૂપા
ચ । અતો યાવજ્જીવં તદર્થં કર્તવ્યસ્ય વિધીયમાનત્વાત્,
“ન પ્રયસ્યેત્ તદર્થમ્” ઇત્યનુપપન્નમ્ । મૈવમ્ -
તત્રાપિ હિ ન્યસ્તભરસ્ય કર્તવ્યાન્તરનૈરપેક્ષ્યમેવ વિવક્ષિતમ્ ।
યદિ તુ પ્રસ્તુતવિદ્યાઙ્ગત્તયાઽત્ર યજ્ઞક્લૃપ્તિર્વિધીયતે તર્હિ
દર્શપૂર્ણમાસાદીનાં ક્લૃપ્તિર્ન વાચ્યા । તેષાં યજ્ઞોપયોગિત્વાભાવાત્
અશ્રુતાપૂર્વતદન્વિતયજ્ઞાન્તરકલ્પનમનેકશાસ્રાર્થદૃષ્ટિવિધિકલ્પનં
(var અશ્રુતપૂર્વં) ચાત્યન્તગૌરવોપહતમ્ । એકસ્યાવભૃતાત્

પૂર્વમન્યેષાં કૃમિશ્ચાનુપપન્ના । તસ્માત્ “એવં શરણમભ્યેત્ય ભગવન્તં સુદર્શીનમ્ । અનુષ્ઠિતક્રતુશતો ભવત્યેવ ન સંશયઃ” ઇતિવત્ યજ્ઞાદિકં સર્વમસ્ય સ્વતઃ સમ્પન્નં ભવતીતિ સ્તુતિમાત્રે તાત્પર્યં ગ્રાહ્યમ્ ।
શારીરકભાષ્યમપિ એતદવિરોધેન ભાવ્યમ્ ॥ ૧૮॥

કૃતકૃત્યસ્યોત્તરદશાયાં સ્વાધિકારાનુગુણં (var સ્વાધેકારાધનુગુણં) ત્યાજ્યં સ્વતન્ત્રવિધિપ્રાપ્તં કર્તવ્યમનુસન્ધેયં પ્રાર્થનીયં ચ સઙ્ગૃહ્ણાતિ – ઉપાયાન્ - કામ્યધર્માન્ । અપાયાન્ - પ્રત્યવાયહેતૂન્ । પરં - કેવલમ્; પ્રપત્યુત્તરકાલમ્ વા । મધ્યમાં - ઉપાયાપાયવર્ગાનન્વિતામ્ । સ્વાર્હવૃત્તિં - - નિત્યરૂપાં તત્સમાનનૈમિત્તિકરૂપાં ચ વૃત્તિમ્ “અપાયસંપ્લવે સદ્યઃ પ્રાયશ્ચિત્તં સમાચરેત્ પ્રાયશ્ચિત્તિરિયં સાઽત્ર યત્પુનઃ શરણં વ્રજેત્ ॥” ઇત્યુક્તમાહ– પ્રાયશ્ચિત્તં ચ યોગ્યમ્ ઇતિ । “અજહત્” ઇન્યનુષજ્યતે । “દેવર્ષિભૂતાત્મનૃણાં પિતૃણાં ન કિઙ્કરો નાયમૃણી ચ રાજન્” ઇત્યાદ્યુક્તં સૂચયતિ – વિગતનૃણતાતિઃ ઇતિ । બ્રહ્મચર્યાદિભિરપાકર્તવ્યં ભગબત્પ્રપન્નસ્ય પ્રપત્યૈવ કૃતમ્ (var પ્રપત્યૈવાપાકૃતં); દેવયજ્ઞાદિકં ત્વસ્ય (var દેવયજ્ઞાદિ કર્તવ્યમસ્ય) મધ્યમબૃત્યનુપ્રવિષ્ટં કૈઙ્કુર્યમિતિ ભાવઃ । દ્વન્દ્વાતિતિક્ષાવચનં પાદાનાર્થં ચ । પરિચરણગુણાન્ - કૈઙ્કુર્યોપકરણભૂતાન્ ગન્ધપુષ્પાદીન્ । યદ્વા ફલસઙ્ગત્યાગાદીન્ । સત્સમૃદ્ધિરપિ (var સત્સમૃદ્ધીરપિ) કૈઙ્કુર્યાનુપયુક્તા નૈવ ઇત્યુક્તમ્ । ભગવતઃ ઇત્યાદિના દેવતાન્તરેભ્યસ્તદીયેભ્યશ્ચ ભક્ત્યાદિકમપિ ન યાચ્યમિતિ સૂચ્યતે ॥ ૧૯॥

ઉક્તપ્રકારસ્યાધિકારિણઃ સ્વાભિમતકાલે પરમફલ્પ્રાપ્તમાહ– પ્રપત્યઙ્ગત્વાન્દેઽપિ “વિહિતત્વાચ્ચાશ્રમકર્માઽપિ” ઇતિ ન્યાયેન સ્વતન્ત્રાધિકારસિદ્ધે શક્તસ્યાસ્ય કર્તવ્યમ્ આજ્ઞાકૈઙ્કુર્યમ્ । અકરણે પ્રત્યવાયરહિતમ્ અનુજ્ઞાકૈઙ્કુરયમ્ । દ્વિરૂપમ્ ઇતિ – પુણ્યપાપરૂપમિત્યર્થઃ ॥ ૨૦॥

પરમપુરુષાર્થસાધિનીં ભગવત્પ્રપત્તિં પ્રમાણતઃ પ્રભાવતઃ પ્રવક્તૃતશ્ચ વિર્શિષન્ તદ્વિષયગ્રન્થનિર્માણપ્રયોજનં ચ

પ્રતિપાદયતિ -

“યો બ્રહ્માણં વિદધાતિ પૂર્વમ્” ઇત્યાદિકયા શ્રુત્યા ;
“ દેવાનાં દાનવાનાં ચ,” “ શરણ્યં શરણં ચ
(var દેવાનાં ચ શરણ્યં શરણં)  ત્વામાહુર્દિવ્યા મહર્ષયઃ
”,  “ શરણં ત્વાં પ્રપન્ના યે ધ્યાનયોગવિવર્જિતાઃ”
ઇતિ સ્મૃત્યાદિભિશ્ચ;  “સ્થિતે મનસિ સુસ્વસ્થે”,
“સકૃદેવ પ્રપન્નાય”, “ સર્વધર્માન્ પરિત્યજ્ય”
ઇત્યાદિભિઃ ભગવદ્વાક્યવર્ગૈશ્ચ । સિદ્ધામ્ - પ્રમિતામિત્યર્થઃ ।
ભગવચ્છબ્દઃ । સ્વાતન્ત્રે પારતન્ત્ર્યેપિ - અવ્યવધાબેન
વ્યવધાનેન વા મુક્તિસાધનત્વે ; યદ્વા સ્વતન્ત્રાઙ્ગત્વવિવાદેઽપિ
ઇત્યર્થઃ ગુજનનગ્રન્થાઃ સ્તોત્રગદ્યાદયઃ ॥ ૨૧॥

ઉક્તમુપાયં સુખગ્રહણાય સ્વાનુષ્ઠાનમુખેન નિગમયતિ –  અત્ર
સર્વશક્તૌ પરમકારુણિકે સર્વાભિમતવરપ્રદે ન્યસ્તભરત્વાત્
નિર્ભરત્વનિર્ભયત્વસીદ્ધિઃ
(var નિર્ભરત્વ-નિર્ભયત્વાદિસિદ્ધિઃ) ॥ ૨૨॥

અયમત્ર મુમુક્ષોરનુશાસનીયસંગ્રહઃ–
સદાચાર્યોપસત્તિપૂર્વકં સમ્યક્ જ્ઞાનં સંપાદ્ય,
ગુરુતરોપાયાન્તરનિષ્પાદનાદ્યનુગુણજ્ઞાનશાક્તિવિરહાન્નિર્વિણ્ણઃ,
સ્વશક્યસકૃત્કર્તવ્યલઘૂપાયપરામર્શેન પ્રત્યવસ્થાપિતઃ
ફલસઙ્ગકર્તૃત્વાદિત્યાગયુક્તસાઙ્ગભરન્યાસેન કૃતકૃત્યઃ
સ્વીકૃતભરં શરણ્યં શ્રિયઃપતિમવલોક્ય નિભરો નિર્ભયશ્ચ
સ્વયમ્પ્રયોજનકૈઙ્કર્યેણ સુખં વર્ત ઇતિ ॥ ૨૨॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

nyAsa viMshati (896 to 917)

This stotra of 22 shlokas all in sragdharA metre, stresses several aspects of nyAsa or prapatti not covered by zaraNAgati dIpikA and nyAsa tilaka. To start with, the qualifications an AchArya should possess are set out in 896, such a one should be worshipped as if he were God Himself; [897] then the traits the shiShya must possess are mentioned in 898. The

unflinching and unshakable faith in the efficacy of prapatti which is a vital part in the pursuit of that path is stressed in 902. shlokas 910 and 911 refute some wrong meanings attributed to certain words in the charama-shloka. siddhopAya and sAdhyopAya are clearly defined in 912. The stotra concludes with expressing a feeling of a sense of security and fearlessness after a proper performance of Prapatti.

Lord varadarAja of kA nchIpuram is the Deity to whom this Stotra and the next are dedicated.

nyAsa viMshati – vyAkhyA.

"At the desire of good and godly men" svAmI deshika has himself written a commentary on nyAsa viMshati by way of "di NmAtra", indicating the way or method. That commentary which is in Sanskrit Prose is given separately at pages 201 to 208. tattva-muktAkalApa is the only other work of deshika in Sanskrit for which he himself has furnished a commentary. That is for tattva, this is for upAya.

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*Nyasa Vimshatih with Commentary*
pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*